शिखावला, स्त्री, ( शिखा + वलच् । टाप् । ) मयूरशिखा । इति राजनिर्घण्टः ॥

शिखावान्, [त्] पुं, (शिखा विद्यतेऽस्य। शिखा + मतुप् । मस्य वः । ) वह्निः । चित्रकद्रुमः । इत्यमरः ॥ केतुग्रहः । इति शब्दरत्नावली ॥ शिखायुक्ते, त्रि ॥ (यथा, मनौ १ । ३८ श्लोके । "केतवः शिखावन्ति ज्योतींषि ॥" इति मेधातिथिकृतभाष्ये ॥)

शिखावृक्षः, पुं, (शिखाया वृक्ष इव ।)दीपवृक्षः । इति शिखातरुशब्ददर्शनात् ॥

शिखावृद्धिः,स्त्री, (शिखेव वृद्धिर्यस्याः ।)कायिका वृद्धिः । प्रात्यहिकदेयलाभः । इति स्मृतिः ॥

शिखिकण्ठं, क्ली, (शिखिनो मयूरस्य कण्ठ इव आकृतिर्यस्य ।) तुत्थम् । इति रत्नमाला ॥

शिखिग्रीवं, क्ली, (शिखिनः ग्रीवेव आकृतिर्यस्य) तुत्थम् । इत्यमरः ॥

शिखिध्वजः,पुं, (शिखिनो वह्नेर्ध्वज इव ।)धूमः । इति त्रिकाण्डशेषः ॥ (शिखी मयूरो ध्वजो यस्य । ) कार्त्तिकेयः । इति शब्दरत्नावली ॥

शिखिनी, स्त्री, ( शिखा विद्यतेऽस्याः । इनिः । स्त्रियां ङीष् । ) मयूरशिखा । इति राजनिर्घण्टः ॥

शिखिपुच्छं, क्ली, ( शिखिनः पुच्छम् । ) मयूरपिच्छम् । यथा,—

"शिखण्डोऽस्त्री पिच्छवर्हे शिखिपुच्छशिखण्डके ॥"

इति शब्दरत्नावली ॥

शिखिप्रियः, पुं, (शिखिनः प्रियः ।) लघुवदरः । इति राजनिर्घण्टः ॥

शिखिमण्डलः, पुं, वरुणवृक्षः । इति शब्दरत्नावली ॥

शिखिमोदा,स्त्री, (शिखिनं मोदयतीति । मुद + णिच् + अच् । टाप् । ) अजमोदा । इति राजनिर्घण्टः ॥

शिखियूपः, पु, श्वेतकारी मृगः । इति राजनिर्घण्टः ॥

शिखिवर्द्धकः,पुं, (शिखिनं जठराग्निं वर्द्धयतीति वृध + खुल् ।)कुष्माण्डः । इति शब्दरत्नावली ॥

शिखिवाहनः, पुं, (शिखी वाहनं यस्य ।) कार्त्तिकेयः । इत्यमरः ॥

शिखिव्रतं, क्ली, (शिखिनो व्रतम् । ) व्रतविशेषः यथा,—

ब्रह्मोवाच ।

"वक्ष्ये प्रतिपदादीनि व्रतानि व्यास श्रूयताम् ।
प्रतिपद्येकभक्ताशी समाप्ते कपिलाप्रदः ।
वैश्वानरपदं याति शिखिव्रतमिदं स्मृतम् ॥"

इति गारुड़े १२९ अध्यायः ॥

शिखी, [न्] पुं, (शिखास्यास्तीति । शिखा + "व्रीह्यादिभ्यश्च ।"५ । २।११६। इति इनिः । ) मयूरः । ( यथा, वृहत्संहितायाम् । ३ । २८ । "शिखिपत्रनिभः सलिलं न करोति द्वादशाब्दानि ॥")

अग्निः । ( यथा, महाभारते । ४ । ५६ । ८ । "खड्गी च धन्वी च विभाति पार्थः शिखी वृतः स्रुग्भिरिवाज्यसिक्तः ॥") चित्रकवृक्षः । इत्यमरः । बलीवर्द्दः । शरः । केतुग्रहः । द्रुमः । कुक्कुटः । इति मेदिनी ॥ घोटकः । इति हेमचन्द्रः । अजलोमा । इति रत्नमाला ॥ सितावरः । मेथिका । इति राजनिर्घण्टः ॥ पर्व्वतः । ब्राह्मणः । दीपः । इति केचित् ॥ शिखायुक्ते, त्रि । इति मेदिनी ॥

शिग्रुः, पुं. ( शेते स्वल्पेऽपि वायौ । शी + "जत्रादयश्च ।"उणा० ४।१०२। इति । रुः ह्रस्वो गुगागमश्च । ) शाकम् । इत्यमरः ॥ वृक्षविशेषः । शजिना इति भाषा । तत्पर्य्यायः । हरितशाकः २ शाकपत्रः ३ सुपत्रकः ४ उपदंशः ५ अमादंशः ६ कोमलपत्रकः ७ बहुमूलः ८ दंशमूलः ९ तीक्ष्णमूलः १० । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । तीक्ष्णत्वम् । वातकफमुखजाड्यव्रणदोषहरत्वम् । दीपनत्वम् रुच्यत्वञ्च । तस्य पत्रशाकगुणाः । रुच्यत्वम् । वातकफघ्नत्वमितानाशित्वम् । कटुत्वम् । उष्णत्वम् । दीपनत्वम् । पथ्यत्वम् । पाचनत्वञ्च * ॥ अपि च ।

"शोभाञ्जनो नीलशिग्रुस्तीक्ष्णगन्धो जनप्रियः ।
मुखमोदः कृष्णशिग्रुश्चक्षुष्यो रुचिराञ्जनः ॥
शोभाञ्जनस्तीक्ष्णकटुः स्वादूष्णः पिच्छिलस्तथा
जन्तुवातार्त्तिशूलघ्नश्चक्षुष्यो रोचनः परः ॥*॥
श्वेतशिग्रुः सुतीक्ष्णः स्यान्मुखभङ्गः सिताह्वयः ।
समूलः श्वेतमरिचो रोचनो मधुशिग्रुकः ॥
श्वेतशिग्रुः कटुस्तीक्ष्णः शोफानिलनिकृन्तनः ।
अङ्गव्यथाहरो रुच्यो दीपनो मुखजाड्यनुत् ॥*॥
रक्तको रक्तशिग्रुः स्यान्मधुरो बहुलच्छदः ।
सुगन्धिः केशरी सिंहो मृगारिश्च प्रकीर्त्तितः ॥
रक्तशिग्रुर्महावीर्य्यो मधुरश्च रसायनः ।
शोफाध्मानसमीरार्त्तिपित्तघ्नः पापमारकः ॥"

इति राजनिर्घण्टः ॥

(वानप्रस्थाश्रमिणां तद्भक्षणनिषेधो यथा मनौ ६ । १४ ।

"वर्ज्जयेन्मधुमांसञ्च भौमानि कवकानि च ।
भूस्तृणं शिग्रुकञ्चैव श्लेष्मातकफलानि च ॥"
"शिग्रुकं वाह्लीकेषु प्रसिद्धं शाकम् ।" इति मेधातिथिकृतभाष्ये ॥ )

शिग्रुजं, क्ली, (शिग्रोर्ज्जायते । इति । जन + ड:) शोभाञ्जनबीजम् । तत्पर्य्यायः । श्वेतमरिचम् २ इत्यमरः ॥ शिग्रुभवे त्रि ॥

शिग्रुबीजं, क्ली, (शिग्रोर्बीजम् । ) शोभाञ्जनबीजम् । इति शब्दचन्द्रिका ॥

शिघ, इ आघ्राणे । इति कविकल्पद्रुमः ॥ भ्वा० ) पर०-सक०-सेट् । इ, शिङ्घते । इति दुर्गादासः ॥

शिङ्घाणं,क्ली, (शिङ्घ + आनकः । पृषोदरादित्वात् कलोपः । इत्युणादिवृत्तौ उज्ज्वलदत्तः ३।८३।) काचपात्रम् । लौहमलम् । नासिकामलम् । इति मेदिनी ॥ शिकनि इति भाषा ॥

शिङ्घाणकः,पुं, शिङ्घते इति । शिघ + "आनकौ लूधूशिंघिधाञ्भ्यः ।" उणा० ३ । ८३ । इति आनकः । ) श्लेष्मा । इत्युणादिकोषः ॥

शिङ्घाणकः,पुं,क्ली,(शिङ्घ + आनकः ।)नासिकामलम् । इत्युणादिकोषः ॥

शिङ्घितं, त्रि, ( शिङ्घ + क्तः । ) घ्रातम् । इति शब्दरत्नावली ॥

शिजि,इ ल कि ङ अव्यक्तध्वनौ । इति कविकल्पद्रुमः ॥ ( चुरा०-पक्षे भ्वा०-अदा० च-आत्म०-अक०-सेट् । ) अव्यक्तध्वनिरिह भूषणकर्त्तृक एव । भूषणानान्तु शिञ्जितमित्यमरात् । इ, शिञ्जते । ल ङ, शिङ्क्ते । कि ङ, शिञ्जयते शिञ्जते मञ्जीरम् । तालैः शिञ्जद्वलयसुभगैर्नर्त्तितः कान्तयाने इत्यत्र शिञ्जदिति गणकृतानित्यत्वादिति रमानाथः । वस्तुतस्तु शिङ्क्ते शिञ्जः पचादित्वादन् ततः शिञ्ज इवाचरतीति क्वौ शत्रन्तम् । इति दुर्गादासः ॥

शिञ्जा, स्त्री, ( शिजि अव्यक्तशब्दे + "गुरोश्च हलः ।" ३।३।१०३ । इत्यः । टाप् । ) भूषणशब्दः । इति शब्दरत्नावली ॥ धनुर्गुणः । इति हेमचन्द्रः ॥

शिञ्जितं, क्ली, ( शिञ्ज + क्तः । ) भूषणध्वनिः । इत्यमरः ॥ ( यथा,—

"नखानि विधुशङ्कया विरहिणी करेणावृणोत्
ततः किशलयभ्रमात् स्वयमथाक्षिपद्भृङ्गतः ।
ततो वलयशिञ्जितं भ्रमरगुञ्जिताशङ्कया
उदहरिति कुहूरवध्वनिधिया ततो मूर्च्छिता ॥"

इत्युद्भटः ॥)

शिञ्जिनी, स्त्री, ( शिञ्जति आकृष्टमुक्ता शब्दायते इति । शिञ्ज + णिनिः । स्त्रियां ङीप् । ) धनुर्गुणः । इत्यमरः ॥ नूपुरः । इति हेमचन्द्रः ॥

शिञ्जी, [ न् ] त्रि, भूषणशब्दविशिष्टः । शिञ्जा विद्यतेऽस्य इत्यर्थे इन्प्रत्ययेन निष्पन्नः ॥

शिट, अनादरे । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) शेटति खलं लोकः । इति दुर्गादासः ॥

शिण्डाकी, स्त्री, खाद्यद्रव्यविशेषः । यथा,—

"शिण्डाकी राजिकायुक्तैः स्यान्मूलकदलद्रवैः ।
सर्षपस्वरसैर्व्वापि शालिपिष्टकसंयुतैः ।
शिण्डाकी रोचनी गुर्व्वी पित्तघ्नी अकरी स्मृता ॥"

इति राजनिर्घण्टः ॥

शितं त्रि, ( शो तनुकरणे + क्तः । "शाच्छोरन्यतरस्याम् ।"७ । ४ । ४१ । इति इकारादेशः ।) दुर्बलः । निशितः इति मेदिनी ॥ ( यथा, रघौ ६ । ४२ ।

"धारां शितां रामपरश्वधस्य
सम्भावयत्युत्पलपत्रसाराम् ॥" )

कृशः । इति विश्वः ॥ ( पुं विश्वामित्रवंशीय ऋषिः । यथा, महाभारते । १३ । ४ । ५३ ।